# 74 - चतुस्सप्ततितम दशकम्
# भगवतो मधुरापुरी प्रवेशः

सम्प्राप्तो मथुरां दिनार्ध विगमे तत्रान्तरस्मिन् वसन्
आरामे विहिताशनः सखि जनैर् यातः पुरीमीक्षितुम् ।
प्रापो राजपथं चिर श्रुति धृत व्यालोक कौतूहल
स्त्रीपुंसोद्य दगण्य पुण्य निगलै राकृष्यमाणो नु किम् ॥ ॥74-1॥

त्वत्पाद् द्युतिवत् सराग सुभगाः त्वन् मूर्तिवद् योषितः
सम्प्राप्ता विलसत् पयोधर रुचो लोला भवत् दृष्टिवत् ।
हारिण्यस् त्वदुरः स्थली वदयि ते मन्दस्मित प्रौढिवत्
नैर्मल्योल् लसिताः कचौघ रुचिव राजत् कला पाश्रिताः॥ ॥74-2॥

तासा माकलयन् नपाङ्ग वलनैः मोदं प्रहर्षाद्भुत
व्यालोलेषु जनेषु तत्र रजकं कञ्चित् पटीं प्रार्थयन् ।
कस्ते दास्यति राजकीय वसनं याहीति तेनोदितः
सद्यस् तस्य करेण शीर्ष मह्रथाः सोऽप्याप पुण्यां गतिम् ॥ ॥74-3॥

भूयो वायक मेक मायत मतिं तोषेण वेषोचितं
दाश्वांसं स्वपदं निनेथ सुकृतं को वेद जीवात्मनाम् ।
मालाभिस् स्तबकैस् स्तवै रपि पुनः माला कृता मानितोः
भक्तिं तेन वृतां दिदेशिथ परां लक्ष्मीं च लक्ष्मीपते ॥ ॥74-4॥

कुब्जा मब्ज विलोचनां पथिपुनः दृष्ट्वाऽङ्गरागे तया
दत्ते साधु किलाङ्ग रागम ददाः तस्या महान्तं हृदि ।
चित्तस्था मृजुता मथ प्रथयितुं गात्रेऽपि तस्यास् स्फुटं
गृह्णन् मञ्जु करेण ता मुदनयः तावज् जगत् सुन्दरीम् ॥ ॥74-5॥

तावन् निश्चित वैभवास् तव विभो नात्यन्त पापा जना:
यत्किञ्चिद् ददते स्म शक्त्यनु-गुणं ताम्बूल माल्यादिकम् ।
गृह्णानः कुसुमादि किञ्चन तदा मार्गे निबद्धाञ्जलिः
नातिष्ठं बत हा यतोऽद्य विपुलाम् आर्तिं व्रजामि प्रभो ॥ ॥74-6॥

एष्या मीति विमुक्त याऽपि भगवन् आलेपदात्र्या तया
दूरात् कातरया निरीक्षित गतिः त्वम् प्राविशो गोपुरम् ।
आघो षानुमित त्व दागम महा हर्षोल्ललद् देवकी
वक्षोज प्रगलत् पयोरस मिषात् त्वत् कीर्ति रन्तर् गता ॥ ॥74-7॥

आविष्टो नगरीं महोत्सववतीं कोदण्ड शालां व्रजन्
माधुर्येण नु तेजसा नु पुरुषैः दूरेण दत्तान्तरः ।
स्रग्भिर् भूषित मर्चितं वर धनुः मा मेति वादात् पुरः
प्रागृह्णास् समरोपयः किल समाक्राक्षी रभाङ्क्षी रपि ॥ ॥74-8॥

श्वः कंस क्षप णोत्सवस्य पुरतः प्रारम्भ तूर्योपमः
चाप ध्वंस महा ध्वनिस् तव विभो देवा नरोमाञ्चयत् ।
कंसस्यापि च वेपथुस् तदुदितः कोदण्ड खण्ड द्वयी
चण्डाभ्याहत रक्षि पूरुष रवैः उत्कूलितोऽभूत् त्वया ॥ ॥74-9॥

शिष्टैर् दुष्ट जनैश्च दृष्ट महिमा प्रीत्या च भीत्या ततः
सम्पश्यन् पुर सम्पदं प्रविचरन् सायं गतो वाटिकाम् ।
श्रीदाम्ना सह राधिका विरहजं खेदं वदन् प्रस्वपन्
आनन्दन् अवतार कार्य घटनात् वातेश संरक्ष माम् ॥ ॥74-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥